॥ श्री गणेशाय नमः ॥

श्रीदेवी
खड्गमालास्तोत्ररत्नम्

॥ प्रार्थना ॥

ह्रीङ्कारानननगर्भितानलशिखां सौः क्लीङ्कलां बिभ्रतीं
सौवर्णाम्बरधारिणीं वरसुधाधौतां त्रिनेत्रोज्ज्वलाम् ।
वन्दे पुस्तकपाशमङ्कुशधरां स्रग्भूषितामुज्ज्वलां
त्वां गौरीं त्रिपुरां परात्परकलां श्रीचक्रसञ्चारिणीम् ॥

अस्य श्रीशुद्धशक्तिमालामहामन्त्रस्य,
उपस्थेन्द्रियाधिष्ठायी वरुणादित्य ऋषिः देवी
गायत्री छन्दः सात्विक ककारभट्टारकपीठस्थित
कामेश्वराङ्कनिलया महाकामेश्वरी
श्री ललिता भट्टारिका देवता,
ऐं बीजं क्लीं शक्तिः, सौः कीलकं
मम खड्गसिद्ध्यर्थे सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥

॥ अथ अङ्गन्यास ॥

उपेस्थेन्द्रियाधिष्ठात्रे वरूणादित्य ऋषये

ॐ नमः शिरसि ।

देवी गायत्री छंदसे

ॐ नमः मुखे ।

सात्विक ककार भट्टारक कामेश्वराङ्कनिलयायै

कामेश्वरि ललिता महाभट्टारिका देवतायै

ॐ नमः हृदये ।

ॐ ऐं बीजाय नमः गुह्ये । (हस्त प्रक्षालनम्)

ॐ सौः शक्तयै नमः पादयोः ।

ॐ क्लीं कीलकाय नमः नाभौ ।

मम् श्रीमहात्रिपुर सुन्दरि प्रसाद सिद्ध्यर्थे

जपे विनियोग ॐ नमः सर्वांगे ।

ॐ ऐं अङ्गुष्ठाभ्याम् नमः ।

ॐ क्लीं तर्जनेभ्याम् नमः ।

ॐ सौः मध्यमाभ्याम् नमः ।

ॐ सौः अनामिकाभ्याम् नमः ।

ॐ क्लीं कनिष्ठिकाभ्याम् नमः ।

ॐ ऐं करतलकरपृष्ठभ्याम् नमः ।

ॐ ऐं हृदयाय नमः। ॐ क्लीं शिरसे स्वाहा ।
ॐ सौः शिखायै वषट् । ॐ सौः कवचाय हूम ।
ॐ क्लीं नेत्रत्रयाय वषट् । ॐ ऐं अस्त्राय फट् ।

ॐ भूः भुवः स्वः दिग्बंधः ॥

॥ ध्यानम् ॥

ॐ अरुणां करूणातरङ्गिताक्षीं
धृतपाशाङ्कुशबाणचापहस्ताम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव
विभावये भवानीम् ॥
तादृशं खड्गमाप्नोति येन हस्तस्थितेनवै ।
अष्टादशमहाद्वीपसम्राड्भोक्ताभविष्यति ॥
आरक्ताभांत्रिनेत्रामरुणिमवसनां रत्नताटङ्करम्यां
हस्ताम्भोजैस्सपाशाङ्कुशमदनधनुस्सायकैर्विस्फुरन्तीम् ।
आपीनोत्तुङ्गवक्षो रुहकलशलुठत्तारहारोज्ज्वलाङ्गीं
ध्यायेदम्भोरुहस्थामरुणिमवसनामीश्वरीमीश्वराणाम् ॥

लं - पृथिवीतत्त्वात्मिकायै
श्रीललिताम्बिका त्रिपुरसुन्दरी पराभट्टारिकायै
गन्धं परिकल्पयामि ।
हं - आकाशतत्त्वात्मिकायै
श्रीललिताम्बिका त्रिपुरसुन्दरी पराभट्टारिकायै पुष्पं
परिकल्पयामि ।
यं - वायुतत्त्वात्मिकायै
श्रीललिताम्बिका त्रिपुरसुन्दरी पराभट्टारिकायै धूपं
परिकल्पयामि ।
रं - तेजस्तत्त्वात्मिकायै
श्रीललिताम्बिका त्रिपुरसुन्दरी पराभट्टारिकायै दीपं
परिकल्पयामि ।
वं - अमृततत्त्वात्मिकायै
श्रीललिताम्बिका त्रिपुरसुन्दरी पराभट्टारिकायै
अमृतनैवेद्यं परिकल्पयामि ।
सं - सर्वतत्त्वात्मिकायै
श्रीललिताम्बिका त्रिपुरसुन्दरी पराभट्टारिकायै
ताम्बूलादिसर्वोपचारान् परिकल्पयामि ।

श्रीदेवी सम्बोधनं - १

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमस्त्रिपुरसुन्दरि ।

न्यासाङ्गदेवताः -६

हृदयदेवि । शिरोदेवि । शिखादेवि ।
कवचदेवि । नेत्रदेवि । अस्त्रदेवि ।

तिथिनित्यादेवताः -१६

कामेश्वरि । भगमालिनि । नित्यक्लिन्ने । भेरुण्डे ।
वह्निवासिनि । महावज्रेश्वरि । शिवदूति । त्वरिते ।
कुलसुन्दरि । नित्ये । नीलपताके । विजये ।
सर्वमङ्गले । ज्वालामालिनि । चित्रे । महानित्ये ।

दिव्यौघगुरवः -७

परमेश्वरपरमेश्वरि । मित्रेशमयि । षष्ठीशमयि ।
उड्डीशमयि । चर्यानाथमयि । लोपामुद्रामयि ।
अगस्त्यमयि ।

सिद्धौघगुरवः -४

कालतापशमयि । धर्माचार्यमयि ।
मुक्तकेशीश्वरमयि । दीपकलानाथमयि ।

मानवौघगुरवः -८

विष्णुदेवमयि । प्रभाकरदेवमयि ।

तेजोदेवमयि । मनोजदेवमयि ।

कल्याणदेवमयि । वासुदेवमयि ।

रत्नदेवमयि । श्रीरामानन्दमयि ।

श्रीचक्र प्रथमावरणदेवताः -३२

अणिमासिद्धे । लघिमासिद्धे । गरिमासिद्धे ।

महिमासिद्धे । ईशित्वसिद्धे । वशित्वसिद्धे ।

प्राकाम्यसिद्धे । भुक्तिसिद्धे । इच्छासिद्धे ।

प्राप्तिसिद्धे । सर्वकामसिद्धे । ब्राह्मि ।

माहेश्वरि । कौमारि । वैष्णवि । वाराहि ।

माहेन्द्रि । चामुण्डे । महालक्ष्मि । सर्वसङ्क्षोभिणि ।

सर्वविद्राविणि । सर्वाकर्षिणि । सर्ववशङ्करि ।

सर्वोन्मादिनि । सर्वमहाङ्कुशे । सर्वखेचरि ।

सर्वबीजे । सर्वयोने । सर्वत्रिखण्डे ।

त्रैलोक्यमोहन चक्रस्वामिनि । प्रकटयोगिनि ।

श्रीचक्र द्वितीयावरणदेवताः -१८

कामाकर्षिणि । बुद्ध्याकर्षिणि । अहंकाराकर्षिणि ।
शब्दाकर्षिणि । स्पर्शाकर्षिणि । रूपाकर्षिणि ।
रसाकर्षिणि । गन्धाकर्षिणि । चित्ताकर्षिणि ।
धैर्याकर्षिणि । स्मृत्याकर्षिणि । नामाकर्षिणि ।
बीजाकर्षिणि । आत्माकर्षिणि । अमृताकर्षिणि ।
शरीराकर्षिणि । सर्वाशापरिपूरकचक्रस्वामिनि ।
गुप्तयोगिनि ।

श्रीचक्र तृतीयावरणदेवताः -१०

अनङ्गकुसुमे । अनङ्गमेखले । अनङ्गमदने ।
अनङ्गमदनातुरे । अनङ्गरेखे । अनङ्गवेगिनि ।
अनङ्गाङ्कुशे । अनङ्गमालिनि ।
सर्वसङ्क्षोभणचक्रस्वामिनि । गुप्ततरयोगिनि ।

श्रीचक्र चतुर्थावरणदेवताः -१६

सर्वसङ्क्षोभिणि । सर्वविद्राविनि । सर्वाकर्षिणि ।
सर्वह्लादिनि । सर्वसम्मोहिनि । सर्वस्तम्भिनि ।
सर्वजृम्भिणि । सर्ववशङ्करि । सर्वरञ्जनि ।
सर्वोन्मादिनि । सर्वार्थसाधिके ।
सर्वसम्पत्तिपूरिणि । सर्वमन्त्रमयि । सर्वद्वन्द्वक्षयङ्करि ।
सर्वसौभाग्यदायकचक्रस्वामिनि । सम्प्रदाययोगिनि ।

श्रीचक्र पञ्चमावरणदेवताः -१२

सर्वसिद्धिप्रदे । सर्वसम्पत्प्रदे ।
सर्वप्रियङ्करि । सर्वमङ्गलकारिणि ।
सर्वकामप्रदे । सर्वदुःखविमोचनि ।
सर्वमृत्युप्रशमनि । सर्वविघ्ननिवारिणि ।
सर्वाङ्गसुन्दरि । सर्वसौभाग्यदायिनि ।
सर्वार्थसाधकचक्रस्वामिनि ।
कुलोत्तीर्णयोगिनि ।

श्रीचक्र षष्ठावरणदेवताः -१२

सर्वज्ञे । सर्वशक्ते । सर्वैश्वर्यप्रदायिनि ।
सर्वज्ञानमयि । सर्वव्याधिविनाशिनि ।
सर्वाधारस्वरूपे । सर्वपापहरे ।
सर्वानन्दमयी । सर्वरक्षास्वरूपिणि ।
सर्वेप्सितफलप्रदे । सर्वरक्षाकरचक्रस्वामिनि ।
निगर्भयोगिनि ।

श्रीचक्र सप्तमावरणदेवताः -१०

वशिनि । कामेश्वरि । मोदिनि । विमले ।
अरुणे । जयिनि । सर्वेश्वरि । कौलिनि ।
सर्वरोगहरचक्रस्वामिनि । रहस्ययोगिनि ।

श्रीचक्र अष्टमावरणदेवताः -९

बाणिनि । चापिनि । पाशिनि । अङ्कुशिनि ।
महाकामेश्वरि । महावज्रेश्वरि । महाभगमालिनि ।
सर्वसिद्धिप्रदचक्रस्वामिनि । अतिरहस्ययोगिनि ।

श्रीचक्र नवमावरणदेवताः -३

श्री श्रीमहाभट्टारिके । सर्वानन्दमयचक्रस्वामिनि ।
परापरातिरहस्ययोगिनि ।

नवचक्रेश्वरी नामानि -९

त्रिपुरे । त्रिपुरेशि । त्रिपुरसुन्दरि । त्रिपुरवासिनि ।
त्रिपुराश्रीः । त्रिपुरमालिनि । त्रिपुरासिद्धे ।
त्रिपुराम्बा । महात्रिपुरसुन्दरि ।

श्रीदेवी विशेषणानि - नमस्कारनवाक्षरीच -९

महामहेश्वरि । महामहाराज्ञि ।
महामहाशक्ते । महामहागुप्ते ।
महामहाज्ञप्ते । महामहानन्दे ।
महामहास्कन्धे । महामहाशये ।
महामहा श्रीचक्रनगरसाम्राज्ञि
नमस्ते नमस्ते नमस्ते नमः ॥

फलश्रुतिः

एषा विद्या महासिद्धिदायिनी स्मृतिमात्रतः ।
अग्निवातमहाक्षोभे राजाराष्ट्रस्य विप्लवे ॥
लुण्ठने तस्करभये सङ्ग्रामे सलिलप्लवे ।
समुद्रयानविक्षोभे भूतप्रेतादिके भये ॥
अपस्मारज्वरव्याधिमृत्युक्षामादिजे भये ।
शाकिनी पूतनायक्षरक्षःकूष्माण्डजे भये ॥
मित्रभेदे ग्रहभये व्यसनेष्वाभिचारिके ।
अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेन्नरः ॥
सर्वोपद्रवनिर्मुक्तस्साक्षाच्छिवमयोभवेत् ।
आपत्काले नित्यपूजां विस्तारात्कर्तुमारभेत् ॥
एकवारं जपध्यानं सर्वपूजाफलं लभेत् ।
नवावर्णदेवीनां ललिताया महौजसः ॥
ललिताया महेशान्या माला विद्या महीयसि ।
नरवश्यं नरेन्द्राणां वश्यं नारीवशङ्करम् ॥
अणिमादिगुणैश्वर्यं रञ्जनं पापभञ्जनम् ।
तत्तदावरणस्थायि देवतावृन्दमन्त्रकम् ॥
मालामन्त्रं परं गुह्यं परं धामप्रकीर्तितम् ।
शक्तिमाला पञ्चधा स्याच्छिवमाला च तादृशी ॥
तस्माद्गोप्यतराद्गोप्यं रहस्यं भुक्तिमुक्तिदम् ॥
इति श्रीवामकेश्वरतन्त्रे उमामहेश्वरसंवादे
देवीखड्गमालास्तोत्ररत्नं समाप्तम् ।